
*विमुक्तः - विमुक्तोऽन्योऽनड्वान्भवति (6-2-1)[समर्थेन अन्यशब्देन स्वरभेदः], [यथा विमुक्तं पुनर्युनक्ति (6-5-34) इत्यत्र 'यथा'योगात् स्वरभेदः]

*सौम्यः - (यत्) सौम्यो भवति (2-3-12,6-6-26) [यद्वृत्तात्] [पवित्रं वै सौम्य आत्मानमेव पवयन्ते (6-6-27) अत्र न]

[*चिह्निताः कोष्टकान्तर्दर्शितप्रकारेण आख्यातस्वरभेदे न पृथग्गेतवः]

यदि - यदि नो जेष्यन्ति (1-5-1)

यानि - यानि घर्मे कपालान्युपचिन्वन्ति (1-1-11)

येन - येन विश्वाः परि द्विषो वृणक्ति (1-2-17), येनयेन छन्दमाऽनु प्रायुङ्क्त (7-4-15)

यत्र - यत्र पीपरत् (1-6-48), यत्रयत्र न्यक्रामत् (2-6-36), यत्रयत्र कामयते (4-6-28), यत्रयत्रावसत् (5-1-4), यत्रयत्रैव मृत्युर्जायते (5-6-11)

यस्य - यस्यामतिर्भा अदिद्युतत् (1-2-13)

यस्मिन् - यस्मिन्थ्स॑ सोभगानि दधिरे (1-3-26)

ययोः - ययोः प्राणोऽसि (2-3-38)

येषां - येषां भागः स्थ(1-3-23)

यासां - यासा॑ राजा वरुणो याति, यासान्देवा दिवि कृण्वन्ति (5-6-1; ए. 1-2)

यथा - यथा शार्यति अपिवः (1-4-19)

यस्मात् - यस्मादेव योनेः प्रजापतिः पशूनसृजत (2-4-33)

*कस्मात् - कस्माथ्सत्यादनस्थिकेन प्रजाः प्रवीयन्ते (6-1-46), कस्माथ्सत्यादेकपात्रा द्विदेवत्या गृह्यन्ते (6-4-39) [अन्यत्र चतुर्दशस्थलेषु प्रश्नार्थक इति साकाङ्क्षवाक्यत्वमेव हेतुः ।]

अथ वर्जनीयाः -

द्वि बष्टा - वीन्द्र॑ सोममाहरत् (2-4-36,2-5-8), यदेवादः सोममाहरत् (6-1-42),

सोमम्, तेभ्यः पूर्वं - सोममरख्यन्तेभ्योऽधि सोममाहरन् (6-1-70), सोममरख्यन् (6-3-2)

यदग्नेः, यत्सोम्यो ब्रह्मवर्चसं - यत्सोम्यो ब्रह्मवर्चसन्तेन कृष्णग्रीव आग्नेयो भवति (2-1-14) [आख्यातात्पूर्वं तच्छब्दघटितत्वात् न]

[यत्सोम्यो ब्रह्मवर्चसन्तेनाग्नेयस्य च सोम्यस्य चेन्द्रे समाश्लेषयेत् (2-3-16) आख्यातात्पूर्वं तच्छब्दघटितत्वेऽपि चकारयोगात्?]

यतः पुरोडाशः - यतः पुरोडाशः कूर्मो भूत्वाऽनु प्रासर्पत् (5-2-44) [अत्र यतः इति सुवन्तम्, अतः स्वरभेदे न स्वरूपयोग्यत्वम्]

यद्वेणोः - यद्वेणोः सुषिर॑ सुषिराऽग्निर्भवति (5-1-4) [वाक्यभेदः]

यत्पुरीषं - यत्पुरीषमग्निमेव वैश्वानरश्निुते (5-6-26) [वाक्यभेदः]

यदन्तरिख्यं - यदन्तरिख्यन्तद् मे पिताऽभूत् (3-5-16) [आख्यातात्पूर्वं तच्छब्दघटितत्वात् न]

यत्त्रेधातवीयं - यत्त्रेधातवीयं कामायकामाय प्रयुज्यते, सर्वेणैव यज्ञेन यजते (2-4-31,32,34) [वाक्यभेदः]

यद्द्वादशोद्यामं - यद्द्वादशोद्याम॑ सन्नँह्यसरेणैव मोञ्जं भवति (5-1-55) [वाक्यभेदः]

पश्चात्सृष्ट॑ हि - पश्चात्सृष्ट॑ ह्येकादशानूयाजान् यजति (6-3-62) [वाक्यभेदः]

पुनर्यद्द्वममहः - यद्द्वममहर्दश्मेऽहन्नेन्द्रवायवो गृह्यते (7-2-31) [वाक्यभेदः]

यच्चतुर्थमहः - यच्चतुर्थमहस्तस्मिन्नाग्रयणो गृह्यते (7-2-32) [आख्यातात्पूर्वं तच्छब्दघटितत्वात् न]

यत्पञ्चममहः - यत्पञ्चममहस्तस्मिन्नेन्द्रवायवो गृह्यते (7-2-32/33) [आख्यातात्पूर्वं तच्छब्दघटितत्वात् न]

यच्चष्ठमहः - यच्चष्ठमहस्तस्मिञ्छुक्रो गृह्यते (7-2-33) [आख्यातात्पूर्वं तच्छब्दघटितत्वात् न]

यत्सप्तममहः - यत्सप्तममहस्तस्मिन्नुष्मृजेयुः (7-5-20) [आख्यातात्पूर्वं तच्छब्दघटितत्वात् न]

सोममरख्यन् - सोममरख्यन् (6-1-70,6-3-2)

सोममाहरन् - सोममाहरन् (6-1-70), सोममाहरत् (2-4-36,2-5-8,6-1-42)[?]

सोममघ्नन् - सोममघ्नन् (6-2-11,6-3-40)

तस्मिन् - तस्मिन्प्रजापतिर्वायुर्भूत्वाऽचरत् (7-1-14)

उत्क्रोदं - न ह्यासां - न ह्यासामिषमूर्जमाददत उत्क्रोदं कुर्वते (7-5-29) इति वर्जयित्वा ॥

तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति | (ऋ.सं.1.164.20)

इन्द्रशत्रुः, इन्द्रशत्रुः, स्थूलपृपती, स्थूलपृपती, क्षुद्रपृपती, क्षुद्रपृपती, नारायणः, नारायणः etc. - compound words with two ways (तत्पुरुष, बहुव्रीहि) of dissolution based on accent.

युवभ्यः, युवभ्याम्, उदगासीत्, राष्ट्रमाऽददत, ऐति सोमच्युतमित्याह सोमच्युतः हास्य राध ऐतिं, विश्वाहा, etc. which have more than one valid sense or split by different rules.

मूलपाठे विशेषाः - त्रैस्वर्य (उदात्तानुदात्तस्वरिताः), चातुःस्वर्य (प्रचययोगेन), सप्तविधस्वरित (नित्य, अभिनिहत, क्षेप्र, प्रश्लिष्ट, पादवृत्त, प्रातिहत, तैरोव्यञ्जन), कम्प (स्वरित, उदात्त), प्लुत, रङ्ग, स्वरभक्त्यादयः । तेषां कृते वेदाङ्गव्याकरणस्य अवश्यज्ञातव्यता वर्तते ।

पदपाठे विशेषाः - त्रिविधाः इतिगाः - उपसर्गाः, प्रगृह्याः, इङ्ग्याः च । तेषु उपसर्गानेकत्वे विशेषाः, प्रगृह्यानामेव इङ्ग्यत्वे विशेषाः इत्यादयः अवधेयाः ।

C. Figures of speech or allegory

उपमालङ्कारः - तत्र वाचकाः यथा, इव, न (अपादादिः), चित्, यादृक्, तथा, एवं, एवा, तादृक् इत्यादयः । Allegories like Simile, as in the use of यथा(ऽ)सादृश्ये । (2.1.7).

यथा (पादान्ते सर्वानुदात्तः) (7) - तिष्ठन्ति स्वारुहो यथा । (तै.सं. 1.6.12.2), तं नेमिमृभवो यथा (2.6.11.1), परावर्ग्भारभृद्यथा (2.6.11.3), आ सर्वं मवितुर्यथा (3.1.11.8), यथिद्धि ते विशो यथा (3.4.11.6), पुरा जीवगृभो यथा (4.2.6.2), रयिर्वीरवतो यथा । (तै.ब्रा. 2.4.8.1) एषः सादृश्यार्थकः ।

यथा आद्युदात्तः (123 occurrences). यथा - तादृक् (एव) तत्, यथा - एवम् .. । [pairing words].

As a first member of a compound, it has a specific sense of conformance to propriety or that of not violating the connected noun sense. Examples are :-

समासे (अनतिक्रान्तार्थे) - यथायजुः, यथायथम्, यथापूर्वम्, यथाकामम्, यथादेवतम्, यथाभागम्, यथायतनम्, यथायतनात्, यथाशरीरम्, यथालोकम्, यथान्युप्तम्, यथाऽवकाशम्, यथावशम्, यथासृष्टम्, यथोदितम्, यथासवनम्, यथास्थानम्, यथाशक्ति, यथासुखम्, यथावट्, यथानामम्, यथर्तु इत्यादि (अयथादेवतम्, अयथापूर्वम् इत्यादि नञि च) ।

We compile some of these occurrences below for detailed understanding.

0. यथा - तथा -- तै.सं. 1.5.9.5, 2.5.5.6, 7.4.5.1 - यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति

तै.ब्रा. 2.7.15.4,5 - यथाऽसां राष्ट्रवर्धनः । तथा त्वा सविता करत् ।

3.6.6.4 - ताविमं पशुः श्रपयतां प्रविद्वा॰सो । यथायथाऽस्य श्रपणन्तथातथा । [उपनिषत्सु च - तं यथायथोपासते तथैव भवति । (छा.उ.)]

तै.आ. 5.11.4 - यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः । .. यथा ते तेषु वर्तेरन् । तथा तेषु वर्तेथाः ।

यादृक् - तादृक् - यादृगेव ददृशे तादृगुच्यते (ऋ.सं. 5.44.6)

यादृगिव वै देवेभ्यः करोति तादृगिवास्मै देवाः कुर्वन्ति । (ऐ.ब्रा. 3.1.6)

It is also noted that in the pair यथा and तथा, तथा is seen first, i.e, before यथा, almost as a norm and after यथा, generally एवम् is seen more often used.

(छन्दसि परेऽपि । (1.4.81), व्यवहिताश्च । (1.4.82) इत्ययमंशः उपसर्गवत् अन्यत्रापि बहुत्र उपयुक्तः वेदेषु । इन्द्रा यो अग्नी सहुरी सपर्यात् । (तै.सं. 4.2.11.1), विष्णू अगन्वरुणा पूर्वहूतौ । (तै.ब्रा. 2.8.4.5) इत्यादिषु समासघटकपदविषयेऽपि इत्यादि बोध्यम् ।)

तै.सं. 2.3.5.1 - सोऽब्रवीदृतमंमीष्व यथा समावच्छ उपैष्याम्यथ ते पुनर्दास्यामीति

3.5.2.1 - सोऽब्रवीद्ब्राह्मणं ते वक्ष्यामि यथा त्वत्पुरोहिताः प्रजाः प्रजनिष्यन्ते

5.5.2.4 - सोऽब्रवीत्तथा वा अहं करिष्यामि यथा त्वा नातिधक्ष्यतीति ।

तै. ब्रा. 1.1.4.6 - साऽब्रवीदिडा मनुम् । तथा वा अहं तवाग्निमाधास्यामि । यथा प्र प्रजया पशुभिर्मिथुनैर्जनिष्यसे ।

2.8.6.9 - एवा बभ्रो वृषभ चेकितान । यथा देव न हृणीषे न हंसि ।

3.1.1.2 - सा नो यज्ञस्य सुविते दधातु । यथा जीवेम शरदस्सवीराः ।

3.1.1.11 - तन्नो देवासो अनुजानन्तु कामम् । यथा तरेम दुरितानि विश्वा ।

एकाग्निकाण्डे - 1.8 - अयमग्निर्गृहपतिस्सुसꣳसत्पुष्टिवर्द्धनः । यथा भगस्याभ्यां ददद्रयिं पुष्टिमथो प्रजाम् । .. प्रजायां आभ्यां प्रजापत इन्द्राग्नी शर्म यच्छतम् । यथैनयोर्न प्रमीयातां उभयोर्जीवतोः प्रजा ।

1.17 - समञ्जेषमिमा अहꣳ सपत्नीरभिभूवरीः । यथाऽहमस्य वीरस्य विराजामि धनस्य च ।

2.1 - तेन ब्रह्माणो वपतेदमस्यायुष्माञ्जरदष्टिर्यथाऽसदयमसौ ।

1. यथा - तादृक् (एव) तत्

तैत्तिरीय संहिता

1.5.2.3 - यथा वामं वसु विविदानो गूहति तादृगेव तत् .. यथा वामं वसु विविदानः प्रकाशं जिगमिषति तादृगेव तत्

1.5.7.4 - यथा पापीयाञ्छ्रेयस आहृत्य नमस्यति तादृगेव तत्

2.2.5.5,6 - यथा जनं यतेऽवसं करोति तादृगेव तत्

2.3.13.3 - यथाऽऽविद्धं निष्कृन्तति तादृगेव तत्

2.5.8.6 - यथा बहिःपरिधि स्कन्दति तादृगेव तत्

3.2.9.5 - यथाऽऽयतया समृच्छते तादृगेव तत्, .. यथा धावद्भ्यो हीयते तादृगेव तत्

3.4.10.3 - यथा प्रयाते वास्तावाहुतिं जुहोति तादृगेव तत् .. यथा क्षेम आहुतिं जुहोति तादृगेव तत्

3.4.10.4 - यथा यज्ञवेशसं वाऽऽदहनं वा तादृगेव तत्

5.2.2.4 - यथातिथय आगताय सर्पिष्वदातिथ्यं क्रियते तादृगेव तत्

5.3.7.2 - यथा जायामानीय गृहेषु निषादयति तादृगेव तत्

5.4.10.5 - यथा व्याघ्रꣳ सुप्तम्बोधयति तादृगेव तत् .. यथा वसीयाꣳसम्भागधेयेन बोधयति तादृगेव तत्

5.4.6.1 - यथा जनं यतेऽवसं करोति तादृगेव तत्

5.5.1.6 - यथा सामि गर्भोऽवपद्यते तादृगेव तत्

5.6.6.2 - यथा ब्रूयादेतन्मे गोपायेति तादृगेव तत्

5.6.9.1 - यथा सवात्प्रत्यवरोहति तादृगेव तत्

6.1.3.3 - यथा वर्मीयाऽमम्प्रत्यपोर्णुते तादृगेव तत्

6.1.8.5 - यथा गृहेषु निधत्ते तादृगेव तत्

6.1.9.1 - यथाऽऽस्याद्गमितं निष्खिदति तादृगेव तत् .. यथाऽख्यत्रापन्नं विधावति तादृगेव तत्

6.2.1.1 - यथाऽनागतायातिथ्यं क्रियते तादृगेव तत्

6.2.5.5 - यथा योनेर्गर्भः स्कन्दति तादृगेव तत्

6.5.9.3 - यथा विमुक्तम्पुनर्युनक्ति तादृगेव तत्

6.5.10.1,2 - यथा पिता पुत्रं क्षित उपधावति तादृगेव तत् .. यथा पुत्रः पितरं क्षित उपधावति तादृगेव तत्

6.5.10.3 - यथा वस्यंस आहरति तादृगेव तत् .. यथा वस्यंस आहृत्य प्राह तादृगेव तत् .. यथा वस्यंस उपनिधायापक्रामति तादृगेव तत्

6.6.7.1 - यथा मृतायानुस्तरणीं घ्नन्ति तादृगेव तत्

7.2.2.3 - यथा प्रत्तां दुहे तादृगेव तत्

7.2.8.6 - यथा वहीयसा प्रतिसारं वहन्ति तादृगेव तत्

7.5.3.2 - यथा मध्ये समुद्रस्य प्लवमन्वर्जेयुस्तादृक्तत्*

तैत्तिरीय ब्राह्मणम्

1.1.6.4 - यथात्मा स्यात् । नाङ्गानि । तादृगेव तत् । .. यथाऽङ्गानि स्युः । नात्मा । तादृगेव तत् ।

1.1.6.8 - यथा त्रीण्यावपनानि पूरयेत् । तादृक्तत् ।*

1.1.9.9 - यर्थर्षभाय वाशिता न्याविच्छायति । तादृगेव तत् ।

1.1.10.6 - यथा ब्राह्मणाय गृहेवासिने परिदाय गृहानेति । तादृगेव तत् ।

1.3.1.4 - यथा सुप्तं बोधयति । तादृगेव तत् ।

1.3.1.5,6 - यथोपाऽऽशु नष्टमिच्छति । तादृगेव तत् । .. यथा नष्टं विद्वा प्राहायमिति । तादृगेव तत् ।

1.5.2.6 - यथा पापाहे कुरुते । तादृगेव तत् ।

1.6.9.7 - यथाऽग्निः स्विष्टकृतर्य्यजति । तादृगेव तत् ।

1.6.10.5 - यथा जनंर्य्यतेऽवसङ्करोति । तादृगेव तत् ।

2.1.2.9 - यथा दिवा प्रजानन्नेति । तादृगेव तत् ।

2.1.2.12 - यथाऽति॑थये॒ प्रद्रु॑ताय शू॒न्याया॑वस॒थाया॑हा॒र्य॑ꣳ हर॑न्ति । ता॒दृगे॒व तत् । .. यथा॒ प्रार्थ॑मोप॒सं प॑रि॒वेवे॑ष्टि । ता॒दृगे॒व तत् ||

2.1.3.6,7 - यथा॒ऽन्यस्मा॑ उपनि॒धाय॑ । अ॒न्यस्मै॑ प्र॒यच्छ॑ति । ता॒दृगे॒व तत् ।

2.1.3.9 - यथाऽति॑थि॒ज्योति॑ष्कृ॒त्वा प॑रि॒वेवे॑ष्टि । ता॒दृगे॒व तत् ।

3.2.8.2,3 - यथा॒ सुवृ॑ष्ट इ॒मामं॑नुवि॒सृत्य॑ । आप॒ ओष॑धीर्म॒हय॑न्ति । ता॒दृगे॒व तत् ।

3.3.6.3,4 - यथा॒ सूत्यै॑ का॒ल आप॑ः पु॒रस्ता॒द्यन्ति॑ । ता॒दृगे॒व तत् ।

3.3.8.8 - यथे॒वादस्सो॒म्येऽध्व॒रे । आ॒देश॑मृ॒त्विग्भ्यो॒ दक्षि॑णा नी॒यन्ते॑ । ता॒दृगे॒व तत् ।

3.8.3.4 - यथ॑र्ष॒भस्य॑ वि॒ष्टप॑ꣳ स॒ꣳस्क॒रोति॑ । ता॒दृगे॒व तत् ।

3.8.21.3 - यथा॒ स्थूरि॑णा या॒यात् । ता॒दृक्तत् ।* .. यथा॒ प्रष्टि॑भि॒र्याति॑ । ता॒दृगे॒व तत् ।।

3.8.22.1 - यथाऽक्षेत्र॒ज्ञोऽन्येन॑ प॒था प्र॑ति॒पादयेत् । ता॒दृक्तत् ।।*

3.8.22.3 - यथो॑पगा॒तार॑ उप॒गाय॑न्ति । ता॒दृगे॒व तत् ।

तैत्तिरीयारण्यकम् - 8.7.3 - यथा ब्रू॒याद॒मुष्मै॑ दे॒हीति॑ । ता॒दृगे॒व तत् ।

ऐतरेयब्राह्मणे - 1.3.6 - यथेमान्प्राणानालुप्य शीर्षं धित्सेत्तादृक्तत्

3.1.10 - यथैव प्रवयणतः पेशः कुर्यात्तादृक्तत्, .. यथैव मध्यतः पेशः कुर्यात्तादृक्तत्, .. यथैवाव प्रच्छनतः पेशः कुर्यात्तादृक्तत्

4.1.4 - यथेह चेह चापथेन चरित्वा पन्थानं पर्यवेयात्तादृक्तत्

4.2.3 - यथैव गत्वा काष्ठामपराध्नुयात् तादृक्तत्, .. यथैव गत्वा काष्ठामभिपद्येत तादृक्तत्

4.3.6 - यथा क्षेत्रज्ञमध्वनः पुरएतारं कुर्वीत तादृक्तत्

5.2.10 - यथा पुनराग्रन्थं पुनर्निग्रन्थमन्तं वध्नीयान्मयूखं वान्ततो धारणाय निहन्यात्तादृक्तत् (यद्धारयन्धारयन्निति शंसति संतत्यै संततेस्त्यहेरव्यवच्छिन्नैर्व्यन्ति य एवं विद्वांसो यन्ति यन्ति) ।

5.5.5 - यथैकतश्चक्रेण यायात्तादृक्तत्, .. यथोभयतश्चक्रेण यान्क्षिप्रमध्वानं समश्नुवीत तादृक्तत्, .. यथा ह वा स्थूरिणैकेन यायादकृत्वाऽन्यदुपयोजनाय । एवं यन्ति ते वहवो जनासः पुरोदयाज्जुह्वति येऽग्निहोत्रम्

5.5.6 - यथा कुमाराय वा वत्साय वाऽजाताय स्तनं प्रतिदध्यात्तादृक्तत्, .. यथा कुमाराय वा वत्साय वा जाताय स्तनं प्रतिदध्यात्तादृक्तत्, .. यथा पुरुषाय वा हस्तिने वाऽप्रयते हस्त आदध्यात्तादृक्तत्, .. यथा पुरुषाय वा हस्तिने वा प्रयते हस्त आदध्यात्तादृक्तत्

6.2.5 - यथाऽभिहेषते पिपासते क्षिप्रं प्रयच्छेत्तादृक्तत्

6.4.7 - यथा श्रान्तोऽविमुच्यमान उत्कृत्येतेवं यजमाना उत्कृत्येरन्, .. यथा दीर्घाध्व उपविमोकं यायात्तादृक्तत्

6.5.4 - यथा पुरुषं वा रेतो वा विच्छिन्द्यात्तादृक्तत्

7.1.1 - यथा सेळगा वा पापकृतो वा पशुं विमथ्नीरंस्तादृक्तत्

कठोपनिषदि - यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति । एवं मुनेर्विजानत आत्मा भवति गौतम ।। (2.1.15)

न्यायभाष्ये च - 2.1.31 - न्या. सू. प्रत्यक्षमनुमानम् एकदेशग्रहणादुपलब्धेः ।। 31 ।। .. तत्र यथा धूमं गृहीत्वा वह्निमनुमिनोति तादृगेव तद् भवति ।

2. यथा - एवम् (एवा)

तैत्तिरीय संहिता

1.5.7.3 - यथा वै पुरुषोऽश्वो गौर्जीर्यत्येवमग्निराहितो जीर्यति

1.6.7.1 - यथा वै संमृतसोमा एवं वा एते संमृतयज्ञाः

1.6.10.5 - यथा वै पर्जन्यः सुवृष्टं वर्षत्येवं यज्ञो यजमानाय वर्षति

2.1.11.3 - यथाऽऽदित्या वसुभिस्संबभूवुर्मरुद्भिः रुद्रास्समजानताभि । एवा त्रिणामन्नहृणीयमाना विश्वे देवास्समनसो भवन्तु ।

2.3.6.2 - यथा वत्सेन प्रत्तां गां दुह एवमेवेमाल्लोकान्प्रत्तान्काममन्नाद्यं दुहे

2.4.11.1 - यथा पुरोडाशे पुरोडाशोऽध्येवमेव तदध्यध्यक्षराणि

2.4.9.3 - यथा ब्रूयादसावेहीत्येवमेवैना नामधेयेरा च्यावयति

3.2.9.5 - यथा वा आयताम्प्रतीख्यत एवमध्वर्युः प्रतिगरम्प्रतीख्यते

4.3.13.2,3 - यथा होतर्मनुषो देवताता यज्ञेभिः सूनो सहसो यजासि । एवा नो अद्य समना समानानुशन्नग्न उशतो यक्षि देवान् ।

4.7.15.7 - यथा ह तद्वसवो गौर्यं चित्पदि षितामभुञ्चता यजत्राः । एवा त्वमस्मत्र मुञ्चा व्यंहः प्रातार्यग्ने प्रतरां न आयुः ।।

5.2.8.5 - यथा क्षेत्रविदञ्जसा नयत्येवमेवैनं कूर्मः सुवर्गं लोकमञ्जसा नयति

5.3.9.1 - यथा पुरुषस्स्नावभिस्संतत एवमेवेताभिरग्निस्संततः

5.3.10.1,2 - यथाप्सु नावा संयात्येवमेवैताभिर्यजमान इमाल्लोकान्त्सं याति

5.3.10.3 - यथासौ देवानाꣳ रोचत एवमेवैष मनुष्याणाꣳ रोचते

5.4.3.1 - यथा वत्सो जातः स्तनम्प्रेप्सत्येवं वा एष एतर्हि भागधेयम्प्रेप्सति

5.4.10.4 - यथा वै पुनराधेयं एवम्पुनश्चितिः

5.5.7.4 - यथा व्याघ्रः क्रुद्धस्तिष्ठत्येवं वा एष एतर्हि

5.7.5.1 - यथा वै पुत्रो जातो म्रियत एवं वा एष म्रियते

5.7.6.5 - यथा वै हविः स्कन्दत्येवं वा एष स्कन्दति योऽग्निं चित्वा स्त्रियमुपैति

6.4.11.3 - यथा प्सारीयति म आख इयति नाप गाष्यामीत्युपावमृजत्येवमेव तदध्वर्युराग्रयणं गृहीत्वा यज्ञमारभ्य वाचं वि सृजते

6.6.7.4 - यथा वै लाङ्गलेनोर्वराम्प्रभिन्दन्त्येवमृक्सामे यज्ञम्प्र भिन्तः

7.1.5.2 - यथाहं युष्मांस्तपसासृंख्येवं तपसि प्रजननमिच्छध्वमिति

7.2.2.3 - यथा दुग्धामुपसीदत्येवमुत्तममहः स्यात्

7.2.4.2 - यथा गुणे गुणमन्वस्यत्येवमेव तल्लोके लोकमन्वस्यति धृत्या अशिथिलम्भावाय

7.4.2.1 - यथा वै मनुष्या एवं देवा अग्र आसन्

7.5.6.2 - यथा दृतिरुपनद्धो विपतत्येवं संवत्सरो वि पतेदार्तिमार्च्छेयुः

7.5.8.5 - यथा सुपर्ण उत्पतिष्यञ्छिर उत्तमं कुरुत एवमेव तद्यजमानाः प्रजानामुत्तमा भवन्ति

7.5.9.2 - यथा वन्धान्मुमुचाना उत्क्रोदं कुर्वत एवमेव तद्यजमाना देववन्धान्मुमुचाना उत्क्रोदं कुर्वते

7.5.15.3 - यथेन्द्रो देवानां यथा मनुर्मनुष्याणामेवम्भवति य एवं विद्वानेतयेष्ट्या यजते (अनेकोपमा)

7.5.23.1,2 - यथाग्निः पृथिव्या समनमदेवम्मह्यम्भद्राः संनतयः सं नमन्तु, .. यथा वायुरन्तरिक्षेण सूर्याय समनमद्दिवे समनमद्यथा सूर्यो दिवा चन्द्रमसे समनमन्नक्षत्रेभ्यः समनमद्यथा चन्द्रमा नक्षत्रैर्वरुणाय समनमदद्भ्यः समनमद्यथा वरुणोऽद्भिः साम्ने समनमदृचे समनमद्यथा साम्नर्चा ब्रह्मणे समनमत्क्षत्राय समनमद्यथा ब्रह्म क्षत्रेण राज्ञे समनमद्विशे समनमद्यथा राजा विशा रथाय समनमदश्वेभ्यः समनमद्यथा रथोऽश्वैः प्रजापतये समनमद्भूतेभ्यः समनमद्यथा प्रजापतिर्भूतैः समनमदेवम्मह्यम्भद्राः संनतयः सं नमन्तु ।। (अनेके पर्यायाः) (मालोपमा)

तैत्तिरीय ब्राह्मणम्

1.2.3.1,2 - यथा शालायै पक्षसी । एवं संवत्सरस्य पक्षसी । .. यथा शालायै पक्षसी मध्यमं वंशमभि समायच्छति । एवं संवत्सरस्य पक्षसी दिवाकीर्त्यमभि सं तन्वन्ति ।

2.1.8.3 - यथा खलु वै धेनुन्तीर्थे तर्पयति । एवमग्निहोत्री यजमानन्तर्पयति ।

2.2.3.3 - यथाऽहयुँष्मांस्तपसाऽसृक्षि । एवमिन्द्रंजनयध्वमिति ।

2.4.6.6 - यथाऽहमस्या अतृपः स्त्रियै पुमान् । यथा स्त्री तृप्यति पुंसि प्रिये प्रिया । एवं भगस्य तृप्याणि । (अनेकोपमा)

2.8.8.7 - यथा देवा असुरेषु । श्रद्धामुग्रेषु चक्रिरे । एवं भोजेषु यज्वसु । अस्माकमुदितङ्कृधि ।

3.1.4.1 - यथा ह वा अग्निर्देवानामन्नाद । एवं ह वा एष मनुष्याणां भवति ।

3.1.6.4 - यथा ब्रन्देवानामसि । एवमह मनुष्याणा भूयासमिति । .. यथा ह वा एतद्देवानाम् । एवं ह वा एष मनुष्याणां भवति ।

3.2.2.4 - यथा वस्यसे प्रतिप्रोच्याहेदङ्करिष्यामीति । एवमेव तदध्वर्युर्देवेभ्यः प्रतिप्रोच्य बर्हिर्दाति । आत्मनोऽहिंसायै ।

3.2.3.7 - यथा प्रदात्रे पुण्यमाशास्ते । एवमेवैना एतदुपस्तौति ।

3.3.4.5 - यथा ह वै योषा सुवर्णं हिरण्यं पेशलं बिभ्रती रूपाण्यास्ते । एवमेता एतर्हीति ।

3.3.7.5 - यथाऽनो वा रथं वा युञ्ज्यात् । एवमेव तदध्वर्युर्यज्ञं युनक्ति ।

3.8.3.3 - यथा वा ऋषभस्य विष्टपम् । एवमेतस्य विष्टपम् ।

3.8.6.1, 3.8.8.1, 3.9.4.4 - यथा वै हविषो गृहीतस्य स्कन्दति । एवं वा एतदश्वस्य स्कन्दति ।

3.8.21.1 - यथा वा अश्वा वर्षभा वा वृषाणस्सꣳस्फुरेरन् । एवमेव तथ्स्तोमास्सꣳस्फुरन्ते ।

3.8.22.2 - यथा क्षेत्रज्ञोऽञ्जसा नयति । एवमेवैनमश्वस्सुवर्गं लोकमञ्जसा नयति ।

काठके 1.10.5 - यथा ख्वेत्रज्ञो भूत्वाऽनु प्रविश्यान्नमत्ति । एवमेवैतान्ख्वेत्रज्ञो भूत्वाऽनु प्रविश्यान्नमत्ति ।

2.7.3,4 - यथा रुक्म उत्तप्तो भायात् । एवमेव स तेजसा यशसा । अस्मिꣳश्च लोकेऽमुष्मिꣳश्च भाति ।

2.7.5 - यथा रथे तिष्ठन्पख्वसी पर्यावर्तमाने प्रत्यपेख्वते । एवमहोरात्रे प्रत्यपेख्वते ।

2.10.3 - यथा वै पर्जन्यस्सुवृष्टं वृष्ट्वा । प्रजाभ्यस्सर्वान्कामान्सम्पूरयति । एवमेव स तस्य सर्वान्कामान्सम्पूरयति ।

तैत्तिरीयारण्यकम्

1.10.7 - यथा गोर्गर्भिण्या उल्बणम् । एवमेतस्या उल्बणम् ।

2.8.1 - यथा स्तेनो यथा भ्रूणहैवमेष भवति योऽयोनौ रेतस्सिञ्चति

4.6.3 - यथा यमाय हार्म्यमवपन्पञ्च मानवाः । एवं वपामि हार्म्यं यथाऽसाम जीवलोके भूरयः ।

4.10.1 - यथाहान्यनुपूर्वं भवन्ति यथर्तव ऋतुभिर्यन्ति क्लृप्ताः । यथा न पूर्वमपरो जहात्येवा धातरायूꣳषि कल्पयैषाम् ।

(अनेकोपमा)** chain of यथा and एवा for एवम्.

[For a parellel, see यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति । यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् सम्भवतीह विश्वम् ।। (मु.उ)]

4.10.2 - यथा बभुर्द्भिनध्योषधे पृथिव्या अधि । एवमिम उद्भिन्दन्तु कीर्त्या यशसा ब्रह्मवर्चसेन ।

5.4.2 - यथाऽऽपः प्रवता यन्ति । यथा मासा अहर्जरम् । एवं मां ब्रह्मचारिणः । धातरायन्तु सर्वतस्स्वाहा । (अनेकोपमा)

6.9.1 - यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वाति .. यथाऽसिधारांकर्तेऽवहितामवक्रामेद्यद्युवे युवे ह वा विह्वयिष्यामि कर्तं पतिष्यामीत्येवमनृतादात्मानंजुगुप्सेत् ।

एकाग्निकाण्डे - 1.13 - यथेयं पृथिवी मही तिष्ठन्ती गर्भमादधे । एवन्तं गर्भमा धेह्यन दशमे मासि सूतवे । .. यथा पृथिव्यग्निगर्भा द्यौर्यथेन्द्रेण गर्भिणी । वायुर्यथा दिशां गर्भ एवं गर्भं दधामि ते । (अनेकोपमा)

2.5 - यथा त्वं सुश्रवस्सुश्रवा असि एवमहं सुश्रवस्सुश्रवा भूयासं .. यथा त्वं सुश्रवस्सुश्रवो देवाना निधिगोपोऽस्येवमहं ब्राह्मणानां ब्रह्मणो निधिगोपो भूयासम् ।

2.6 - यथा त्वमग्ने समिधा समिद्ध्यसं एवं मामायुषा वर्चसा सन्या मेधया प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा ।

2.11 - यथैव सोमः पवते यथा समुद्र एजति । एवन्ते गर्भ एजतु सह जरायुणा निष्क्रम्य प्रतितिष्ठतु । (अनेकोपमा) .. धात्रा हि तथा कृतम् ।

2.19 - यथाऽग्निरक्षितोऽनुपदस्त एवं मह्यं पित्रेऽक्षितोनुपदस्तः, .. यथा वायुरक्षितोऽनुपदस्त एवं मह्यं पितामहायाक्षितोऽनुपदस्तः, .. यथाऽऽदित्योऽक्षितोऽनुपदस्त एवं मह्यं प्रपितामहायाऽक्षितोनुपदस्तः ।

Effect of तथा is present without the word!

तै.सं. 1.4.18.1 - इन्द्रं मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य ।

1.6.12.3 - अंहसो यत्र पीपरद्यथा नो नावेव यान्तमुभये हवन्ते ।

1.7.1.6 - यजमानेन खलु वै तत्कार्यमित्याहुर्यथा देवत्रा दत्तं कुर्वीतात्मन् पशून् रमयेतेति

1.8.6.2 - सुभेषजं यथाऽसति । .. यथा नः श्रेयसः करद्यथा नो वस्यसः करद्यथा नः पशुमतः करद्यथा नो व्यवसाययात् । (अनेकोपमा)

1.8.21.1, 5.2.11.2, तै.ब्रा. 2.6.1.3 - यथा दान्त्यनुपूर्वं वियूय । इहेहैषां कृणुत भोजनानि ।

2.5.12.4 - प्र ते यक्षि प्र त इयर्मि मन्म भुवो यथा वन्द्यो नो हवेषु ।

2.6.12.4 - अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः ।

3.2.8.6 - यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत् । यथा न इन्द्र इद्विशः केवलीः सर्वाः समनसः करत् । यथा नः सर्वा इद्दिशोऽस्माकं केवलीरसन् । (अनेकोपमा)

3.4.11.2 - यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे । यथा तोकाय रुद्रियम् ।

4.3.11.3,4 - भूयासंमस्य सुमतो यथा यूयमन्या वो अन्यामति मा प्र युंक्त । (2)

4.5.1.2 - यथा नः सर्वमिज्जगंदयक्ष्मं सुमना असंत् ।

4.5.10.1 - यथा नः शमसंद्विपदे चतुंष्पदे विश्वंम्पुष्टम्ग्रामें अस्मिन्ननांतुरम् ।

5.5.4.3 - चित्तिं जुहोमि मनसा घृतेन यथा देवा इहागमंन्वीतिहोत्रा ऋतावृधः

7.1.1.1 - द्वौ स्तोमौ प्रातःसवनं वंहतो यथा प्राणश्चांपानश्च द्वौ माध्यंदिनꣳ सवनं यथा चक्षुंश्च श्रोत्रं च द्वौ तृतीयसवनं यथा वाक्चं प्रतिष्ठा च पुरुंषसम्मितो वा एष यज्ञोऽस्थूंरिः

7.5.7.4 - इन्द्र क्रतुं न आ भंर पिता पुत्रेभ्यो यथा ।

तै.ब्रा. 1.2.1.14 - दर्शमहं पूर्णमांसं यज्ञं यथा यजे ।

2.2.10.4 - तन्देवा अंब्रुवन् । सुवीर्यो मर्या यथा गोपायत इतिं । तथ्सूर्यस्य सूर्यत्वम् ।

2.4.1.3 - (अपापांचो अभिभूते नुदस्व । अपोदीचो अपंशूराधरा चं उरो ।) यथा तव शर्मन्मदेम ।

2.4.3.9 - तमुं स्तोतारः पूर्व्यथा विद ऋतस्यं । गर्भꣳ हविषा पिपर्तन ।

2.4.4.5 - देवा भागय्यँथा पूर्वे । सञ्जानाना उपासंत । .. समानमंस्तु वो मनः । यथा वस्सुसहासंति ।

2.4.8.7 - अग्निः प्रंथमः प्राश्नांतु । स हि वेद यथा हविः ।

2.7.18.4 - तद्यथा ह वै संचक्रिणौ कप्लंकावुपावंहितो स्याताम् । एवमेतौ युग्मन्तौ स्तोमौ । .. तद्यथा ह वै सूंतग्रामण्यः । एवञ्छन्दाꣳसि ।

2.8.6.3 - भुवन् यथा नो विश्वं वृधासः । करन्थ्सुपाहा विधुरन्न शवः ।

2.8.7.3 - यथा शमस्मे शमसंद्दुरोणे । तथ्सूर्य द्रविणन्धेहि चित्रम् ।

3.7.6.22 - उद्यन्नद्य वि नो भज । पिता पुत्रेभ्यो यथा ।

3.7.7.14 - यथाऽयय्यँजंमानो न रिष्येत् । देवस्य सवितुस्सवे ।

3.7.13.4 - श्रेष्ठंन्नो अत्र द्रविणय्यँथा दधंत् ।

तै.आ. 1.2.1 - अक्षय्याध्स्यन्दते यंथा ।

1.8.6 - तेऽशरीराः प्रंपद्यन्ते । यथाऽपुंण्यस्य कर्मणः ।

1.32.3 - यंथाशक्ति वा ।?

4.1.1 - इष्टापूर्तमनु संपंश्य दक्षिणाय्यँथा ते दत्तं बंहुधा विबंन्धुषु ।

4.1.2 - पुरुंषस्य सयावर्यपेदघानि मृज्महे । यथा नो अत्र नापंरः पुरा जरस आयंति ।

4.5.2 - यथा पश्च यथा पञ्चथा पर्श दग्नर्पयः । यमर्यौ विंयाघ्स व्रूंयाद्यथेक ऋषिर्विज्ञानते । (अनेकोपमा)

4.6.2 - सीते वन्दामहे त्वाऽर्वाचीं सुभगे भव । यथां नस्सुभगा मंसि यथां नस्सुफला मंसि ।

4.7.1 - माता पुत्रर्यँधांसिचाभ्येंनं भूमि वृणु ।

4.9.1 - य एतस्यैं दिशः पराभंवन्नघायवों यथा तेनाभंवान्पुनः ।

7.37.1 - आहुरावंद्य । शृतस्यं हुविषो यथा ।

काठके - 3.3.3 - यथां देवेस्संधमादं मदेम ।। एकाग्निकाण्डे - 2.10 - अग्निः प्राश्नांतु प्रथमस्स्म हि वेद यथां हविः । 2.16 - ओलंव इत्तमुपाह्व यथार्जीञ्ज्यामम्नवलः ।

उपमानान्तराणि - नवदाव्यांसु वा ओषधीषु पश्चवों रमन्ते । नवदावों ह्येंषां प्रियः । यावंत्प्रियो ह वै नंवदावः पंशूनाम् । तावंत्प्रियः पश्नूनां भंवति । य एवं वेदं । (तै.ब्रा. 3.3.2.4,5)

इव - इवेन नित्यं समासो विभक्त्यलोपश्च - ऋग्वेदे सर्वत्र, दिवीव, जीमूतस्येव, इत्यादि । तैत्तिरीये तु सर्वत्र पृथक् पदमेव । तत्त्ववोधिन्यां कण्ठोक्तम् ।

प्राणो हि प्रियः प्रजानाम् । प्राण इंव प्रियः प्रजानां भवति । य एवं वेदं । (तै.ब्रा. 2.3.9.5)

मातेवास्मा अदिते शर्म यच्छ (), पितेवं पुत्रमभिरंक्षतादिमम् (), स नः पितेवं सूनवेऽग्ने सूपायनो भंव (), रथ्येंव जग्मुः (), इन्द्राणीवांविधवा । अदिंतिरिव सुपुत्रा । ()

समुद्र इंव हि कामंः । नेव हि कामस्यान्तोऽस्तिं । न संमुद्रस्यं । (), समुद्रमिंव सिन्धंवः (तै.सं. 7.1.26)

न इत्युपमार्थे - समुद्रं न सुहवं तस्थिवांसम् (), समुद्रं न सिन्धंवः (), नीचा तन्धंक्ष्यतसं न शुष्कम् (), प्राणस्यं विद्वान्स्संमरे न धीरंः (), रथं न धीरः स्वपां अतक्षम् (), इन्द्रं न त्वां वारवंन्तम् (), नग्नहुर्धीरस्तसंरं न वेमं (), श्रिया न मासंरम् (),

मालोपमा - एवमिंव हि पशुरुल्बमिव चर्मेव मौसमिवास्थींव यावांनेव पशुः (तै.सं. 3.4.1), ओजंसा वा एता वहंन्तीरिवोद्गंतीरिव आकूजंतीरिव धावंन्तीः (तै. आ. 1.), अनेकोपमास्थलानि । सन्नतिहोममन्त्रेषु वहुधा प्रार्थना दृश्यते ।

हेतुमाला - याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति पर्जन्येनोषधिवनस्पतयः प्रजायन्त ओषधिवनस्पतिभिरन्नं भवत्यन्नेन प्राणाः प्राणैर्वलं वलेन तपस्तपसा श्रद्धा श्रद्धया मेधा मेधया मनीषा मनीषया मनो मनसा शान्तिश्शान्त्या चित्तश्चित्तेन स्मृतिः स्मृत्या स्मारः स्मारेण विज्ञानर्विज्ञानेनात्मानर्वेदयति । .. अन्नात् प्राणा भवन्ति भूतानां प्राणैर्मनो मनसश्च विज्ञानर्विज्ञानादानन्दो व्रह्मयोनिः । (तै.आ. 6.63)

अग्निं वै जातं पाप्मा जग्राह तन्देवा आहुतीभिः पाप्मानमपाघ्नन्नाहुतीनाय्यँज्ञेन यज्ञस्य दक्षिणाभिर्दक्षिणानां ब्राह्मणेन ब्राह्मणस्य छन्दोभिश्छन्दसाꣳ स्वाध्यायेनापहतपाप्मा स्वाध्यायो देवपवित्रव्वाँ एतत् । (तै.आ. 2.15)

रूपकम् - * तस्यैवव्विँदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदश्शिखा हृदयय्यूँपः काम आज्यं मन्युः पशुस्तपोऽग्निश्शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीद्यावद्ध्रियते सा दीक्षा यदश्नाति यत्पिबति तदस्य सोमपानय्यँद्रमते तदुपसदो यथ्संचरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखन्तदाहवनीयो यदस्य विज्ञानन्तज्जुहोति यथ्सायं प्रातरत्ति तथ्समिधो यथ्सायंप्रातर्मध्यन्दिनश्च तानि सवनानि ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्द्धमासाश्च मासाश्च ते चातुर्मास्यानि य ऋतवस्ते पशुबन्धा ये संवँथ्सराश्च परिवथ्सराश्च तेऽहर्गणास्सर्ववेदसव्वाँ एतथ्सत्रय्यँन्मरणन्तदवभृथ एतद्वै जरामर्यमग्निहोत्रꣳ सत्रम् । (तै.आ. 6.64).

* यो वा अश्वस्य मेध्यस्य शिरो वेद शीर्षण्वान्मेध्यो भवत्युषा वा अश्वस्य मेध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणश्चन्द्रमाः श्रोत्रन्दिशः पादा अवान्तरदिशाः पर्शवोऽहोरात्रे निमेषोऽर्धमासाः पर्वाणि मासाः संधानान्यृतवोऽङ्गानि संवथ्सर आत्मा रश्मयः केशा नक्षत्राणि रूपन्तारका अस्थानि नभो माꣳसान्योषधयो लोमानि वनस्पतयो वाला अग्निर्मुखव्वैँश्वानरो व्यात्तम् समुद्र उदरमन्तरिक्षम्पायुर्द्यावापृथिवी आण्डौ ग्रावा शेपः सोमो रेतो यज्जञ्भ्यते तद्वि द्योतते यद्विधूनुते तथ्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वागहर्वा अश्वस्य जायमानस्य महिमा पुरस्ताज्जायते रात्रिरेनम्महिमा पश्चादनु जायत एतौ वै महिमानावश्वमभितः सम्बभूवतुर्हयो देवानवहदर्वासुरान्वाजी गन्धर्वानश्वो मनुष्यान्थ्समुद्रो वा अश्वस्य योनिः समुद्रो बन्धुः ।। (तै.सं. 7.5.25.1,2).

* यो वै नक्षत्रियं प्रजापतिव्वेँद । उभयोरेनल्लोँकयोर्विदुः । हस्त एवास्य हस्तः । चित्रा शिरः । निष्ट्या हृदयम् । ऊरू विशाखे । प्रतिष्ठाऽनूराधाः । एष वै नक्षत्रियꣳ प्रजापतिः । य एवव्वेँद । उभयोरेनल्लोँकयोर्विदुः । (तै.ब्रा. 1.5.2.2).

* शिरो वा एतद्यज्ञस्य यद्धविर्धानम् प्राणा उपरवा हनू अधिषवणे जिह्वा चर्म ग्रावाणो दन्ता मुखमाहवनीयो नासिकोत्तरवेदिरुदरꣳ सदो यदा खलु वै जिह्वया दथ्स्वधि खादत्यथ मुखं गच्छति यदा मुखं गच्छत्यथोदरं गच्छति तस्माद्धविर्धाने चर्मन्नधि ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्ति यो वै विराजो यज्ञमुखे दोहं वेद दुह एवैनामियं वै विराट्तस्यै त्वक्चर्मोधोऽधिषवणे स्तना उपरवा ग्रावाणो वथ्सा ऋत्विजो दुहन्ति सोमः पयो य एवं वेद दुह एवैनाम् ।। (तै.सं. 6.2.11.3,4).

अन्नमय, प्राणमय, मनोमय, विज्ञानमयानन्दमयाख्य पञ्चकोशेषु शिरः, दक्षिणोत्तरपक्षौ, आत्मा, पुच्छं च रूप्यते । (ब्रह्मविदिदमयमिदम् । अन्नात् प्राणो व्यानोऽपान आकाशः पृथिवी । प्राणं प्राणमयान्मनो यजुर्ऋक्सामादेशोऽथर्वाङ्गिरसः । यतः श्रद्धर्तꣳ सत्यय्योँगो महः । विज्ञानं प्रियं मोदः प्रमोद आनन्दो ब्रह्म ।) (तै.आ. 5.14.1-5).

मानुषीः देवीश्च समाज्ञाः - क्षेम इति वाचि । योगक्षेम इति प्राणापानयोः । कर्मेति हस्तयोः । गतिरिति पादयोः । विमुक्तिरिति पायौ । इति मानुषीस्समाज्ञाः । अथ देवीः । तृप्तिरिति वृष्टौ । बलमिति विद्युति । यश इति पशुषु । ज्योतिरिति नक्षत्रेषु ।

प्रजातिरमृतमानन्द इत्युपस्थे । सर्वमित्याकाशे । तत्प्रतिष्ठेत्युपासीत । प्रतिष्ठावान्भवति । तन्मह इत्युपासीत । महान्भवति । तन्मन इत्युपासीत । मानवान्भवति । तन्नम इत्युपासीत । नम्यन्तेऽस्मै कामाः । तद्ब्रह्मेत्युपासीत । ब्रह्मवान्भवति । तद्ब्रह्मणः परिमर इत्युपासीत । पर्येणं म्रियन्ते द्विषन्तस्सपत्नाः । परि येऽप्रिया भ्रातृव्याः । (तै.आ. 5.15).

श्रिरो मे श्रीः, यशो मुखम्, ..

महासँहिताः - अधिलोकमधिज्योतिषमधिविद्यमधिप्रजमध्यात्मम् । ता महासꣳहिता इत्याचक्षते । अथाधिलोकम् । पृथिवी पूर्वरूपम् । द्यौरुत्तररूपम् । आकाशस्सन्धिः । वायुस्सन्धानम् । इत्यधिलोकम् । अथाधिज्योतिषम् । अग्निः पूर्वरूपम् । आदित्य उत्तररूपम् । आपस्सन्धिः । वैद्युतस्सन्धानम् । इत्यधिज्योतिषम् । अथाधिविद्यम् । आचार्यः पूर्वरूपम् । अन्तेवास्युत्तररूपम् । विद्या सन्धिः । प्रवचनꣳ सन्धानम् । इत्यधिविद्यम् । अथाधिप्रजम् । माता पूर्वरूपम् । पितोत्तररूपम् । प्रजा सन्धिः । प्रजननꣳ सन्धानम् । इत्यधिप्रजम् । अथाध्यात्मम् । अधराहनुः पूर्वरूपम् । उत्तराहनुरुत्तररूपम् । वाक्सन्धिः । जिह्वा सन्धानम् । इत्यध्यात्मम् । इतीमा महासꣳहिताः । य एवमेता महासꣳहिता व्याख्याता वेद । सन्धीयते प्रजया पशुभिः । (तै.आ. 5.3.1-4).

महाव्याहृतयः - भूर्भुवस्सुवरिति वा एतास्तिस्रो व्याहृतयः । तासामुहस्मै तां चतुर्थीम् । माहाचमस्यः प्रवेदयते ।मह इति । तद्ब्रह्म । स आत्मा । अङ्गान्यन्या देवताः । भूरिति वा अयल्लोँकः । भुव इत्यन्तरिक्षम् ।सुवरित्यसौ लोकः ।

मह इत्यादित्यः । आदित्येन वाव सर्वे लोका महीयन्ते । भूरिति वा अग्निः । भुव इति वायुः । सुवरित्यादित्यः । मह इति चन्द्रमाः । चन्द्रमसा वाव सर्वाणि ज्योतीꣳषि महीयन्ते ।भूरिति वा ऋचः । भुव इति सामानि । सुवरिति यजूꣳषि । मह इति ब्रह्म । ब्रह्मणा वाव सर्वे वेदा महीयन्ते । भूरिति वै प्राणः । भुव इत्यपानः । सुवरिति व्यानः । मह इत्यन्नम् । अन्नेन वाव सर्वे प्राणा महीयन्ते । ता वा एताश्चतस्रश्चतुर्धा ।चतस्रश्चतस्रो व्याहृतयः । ता यो वेद । स वेद ब्रह्म । सर्वेऽस्मै देवा बलिमावहन्ति ।। (तै.आ. 5.5.1-3).

* आत्मानं रथिनं विद्धि शरीर रथमेव च । बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ।। इन्द्रियाणि हयानाहुर्विषयाँ स्तेषु गोचरान् । आत्मेन्द्रियमोयुक्तं भोक्तेत्याहुर्मनीषिणः ।। यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा । तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ।। यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा । तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ।। विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ।। (कठोपनि. 1.3.3-6,9).

अनन्वयः - *नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । (तै.आ. 5.1,12).

प्रणवमहिमा - *ओमिति ब्रह्म । ओमितीद॰ सर्वम् । ओमित्येतदनुकृति ह स्म वा अप्योश्रावयेत्याश्रावयन्ति ।ओमिति सामानि गायन्ति । ओ॰शोमिति शस्त्राणि श॰सन्ति । ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति ।ओमिति ब्रह्मा प्रसौति । ओमित्यग्निहोत्रमनुजानाति । ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति । ब्रह्मैवोपाप्नोति । (तै.आ. 5.8.1).

*सर्वे वेदा यत्पदमामनन्ति तपाँसि सर्वाणि च यद्वदन्ति । यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीमि ओमित्येतत् ।। एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येक्षरं परम् । एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ।। एतदालम्बनँ श्रेष्ठमेतदालम्बनँ परम् । एतदालम्बनँ ज्ञात्वा ब्रह्मलोके महीयते ।। (कठोपनि. 1.2.15-17).

स्वाध्यायप्रवचनयोस्तपस्त्वम् - *ऋतश्च स्वाध्यायप्रवचने च । सत्यश्च स्वाध्यायप्रवचने च । तपश्च स्वाध्यायप्रवचने च । दमश्च स्वाध्यायप्रवचने च । शमश्च स्वाध्यायप्रवचने च । अग्नयश्च स्वाध्यायप्रवचने च । अग्निहोत्रश्च स्वाध्यायप्रवचने च । अतिथयश्च स्वाध्यायप्रवचने च । मानुषश्च स्वाध्यायप्रवचने च । प्रजा च स्वाध्यायप्रवचने च । प्रजनश्च स्वाध्यायप्रवचने च । प्रजातिश्च स्वाध्यायप्रवचने च । सत्यमिति सत्यवचा राथीतरः । तप इति तपोनित्यः पौरुशिष्टिः । स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः । तद्धि तपस्तद्धि तपः । (तै.आ. 5.9.1).

D. Explanation/elucidations

तुमर्थे सेनसे क्से क्सेन् .. वेदैकनियतशब्दरूपाणि वैदिकप्र(व्या)करणे अनुशिष्टः ।

सांहितिकदीर्घ, रङ्गदीर्घादि (ऋक्षु यजुःषु च भेदः) प्रातिशाख्ये - वावशान मामहान इत्यादयः

नवपदशय्या शिक्षायां

E. Conversational specialities (like pluta for discussions) and

प्लुतशिक्षा - विभागः

अथ प्लुताः ।

संहितायाम् - वृहस्पतिसुतस्याग्निहोत्र॰ स४श्रवा द्वेद्वे मित्रोऽसि सप्त त्वष्टा ब्रह्मवादिनेऽद्भिर्मनुरेकमेकं यदेकेन यजुषा वै वाग्वै ब्रह्मवादिनो विचित्यः पर्यग्निर्द्वेद्वे पशुमालभ्य ब्रह्मवादिनः स त्वै प्राणो वा

एकमेकमिन्द्रो वृत्रमहन्नमध्यम॰ समिष्टयजू॰षि द्वेद्वे सोमो वा एक॰ सहस्रतम्या न मध्यमं द्वे भूस्तीण्युध्सृज्या न मध्यमं द्वे एकचत्वारि॰शत्प्लुताः ।।

ब्राह्मणे - द्वादशसु देवासुरा इन्द्रो वृत्र॰ हत्वाऽग्निर्वाव संवथ्सरो द्वेद्वे मित्रोऽसि सप्त प्रजापतिरग्निन्न मध्यमं द्वे प्रजापतिर्व्यस्र॰सत यज्ञो राय एकमेकं मित्रोऽसि त्रीणि प्रजापतिस्ता ओदनन्ता सूर्याचन्द्रमसा

द्वेद्वे उपहूतमुपहूतमेकमेकं यो वै ब्रह्मणे द्वे युञ्जन्ति त्रीण्यश्वस्य द्वे प्रजापतिर्देवान् द्वेद्वे एकचत्वारिंशत्प्लुताः ॥

आरण्यके - विश्वा अग्निश्च सावित्रमसन्नेव द्वयंद्वयम् । देवा एकत्रकं सप्त षोडशारण्यके प्लुताः ॥

संहितायाम् -

1. बृहस्पतिसुतस्य (द्वे) - अग्ना(3)इ पत्नीवा(3)ः (1-4-28) इ

2. अग्निहोत्रं (द्वे) - उपस्थेयोऽग्नी(3) र्नोपस्थेया(3) इत्याहुः (1-5-41) वि

3. सꣳश्रवाः (द्वे) - न छिनत्ती(3) इति छिनत्ति (1-7-7), न छिनत्ती(3) इति न छिनत्ति (1-7-10) वि

4. मित्रोऽसि (सप्त) - सुकतुर्ब्रह्मा(3)न्, सत्यसवो ब्रह्मा(3)न् (1-8-31), सत्योजा ब्रह्मा(3)न्, सुश्रेवो ब्रह्मा(3)न्, सुश्लोकाँ(4) सुमङ्गलाँ (4) सत्यराजा(3)न् । (1-8-32) दू

5. त्वष्टा (एकं) - त्वी(3) इत्यब्रवीत् (2-4-41)

6. ब्रह्मवादिनोऽद्भिः (एकं) - अग्ना(3)नग्नीदित्याह (2-6-29)

7. मनुः (एकं) - उपहूताँ(4) हो इत्याह (2-6-38) दू

8. यदेकेन (द्वे) - वायव्याः कार्या(3)ः प्राजापत्या(3) इत्याहुः (5-5-3) वि

9. यजुषा वै (द्वे) - न्यङ्ङग्निश्चेतव्या(3) उत्ताना(3) इति (5-5-16) वि

10. वाग्वै (द्वे) - होतव्यन्दीक्षितस्य गृहा(3)इ न होतव्या(3)मिति (6-1-29) वि, इ

11. ब्रह्मवादिनो विचित्यः (द्वे) - विचित्यस्सोमा(3) न विचित्या(3) इति (6-1-59) वि

12. पर्यग्नि (द्वे) - अन्वारभ्यः पशू(3)र्नान्वारभ्या(3) इति (6-3-41) वि

13. पशुमालभ्य (एकं) - शृतꣳ हवी(3)श्शमितः (6-3-51) प्र

14. ब्रह्मवादिनः स त्वै (एकं) - अध्वर्योऽवेरपा(3) इत्याह (6-4-15)

15. प्राणो वा (एकं) - अग्ना(3) इत्याह (6-5-29)

16. इन्द्रो वृत्रमहन् (न मध्यमं द्वे) - जुहवानी(3) मा होषा(3)मिति (6-5-32) वि [मा इत्यत्र प्लुताभावः न मध्यममित्यनेनोच्यते ।]

17. समिष्टयजूꣳषि (द्वे) - यज्ञे यज्ञं प्रत्यतिष्ठिपा(3) यज्ञपता(3)विति (6-6-8) वि

18. सोमो वा (एकं) - अस्तु ही(3) इत्यब्रूतां (7-1-21)

19. सहस्रतम्या (न मध्यमं द्वे) - सहस्रꣳ सहस्रतम्यन्वेती(3) सहस्रतमीꣳ सहस्रा(3)मिति (7-1-32) [सहस्रतमीमित्यत्र प्लुताभावः न मध्यममित्यनेनोच्यते ।] वि

20. भूः (त्रीणि) - लाजी(3)ञ्छाची(3)न् यशोममा(4)म् । (7-4-51) दू

21. उष्मृज्या (न मध्यमं द्वे) - उष्मृज्या(3)न्नोष्मृज्या(3)मिति (7-5-19) वि [नो इत्यत्र प्लुताभावः न मध्यममित्यनेनोच्यते ।]

एकचत्वारिंशत्प्लुताः ॥

ब्राह्मणे -

1. द्वादशसु (द्वे) - द्वादशविक्रामा(3) इति । (1-1-26), अद्रा(3)गित्याह । (1-1-27) वि

2. देवासुराः (द्वे) - होतव्यमग्निहोत्रा(3)न्न होतव्या(3)मिति (1-1-53) वि

3. इन्द्रो वृत्रं हत्वा (द्वे) - प्राश्या(3)न्न प्राश्या(3)मिति । (1-3-61) वि

4. अग्निर्वाव संवत्सरो (द्वे) - प्र चातुर्मास्ययाजी मीयता(3) न प्रमीयता(3) इति । (1-4-66) वि

5. मित्रोऽसि (सप्त) - ब्रह्मा(3)न्त्वं राजन् (1-7-60), ब्रह्मा(3)न्त्वं राजन्, ब्रह्मा(3)न्त्वं राजन्, ब्रह्मा(3)न्त्वं राजन् (1-7-61), सुश्लोकाँ(4) सुमङ्गलाँ (4) सत्यराजा(3)नित्याह । (1-7-64) दू

6. प्रजापतिरग्निं (न मध्यमं द्वे) - जुहवानी(3) मा होषा(3)मिति । (2-1-5) [मा इत्यत्र प्लुताभावः न मध्यममित्यनेनोच्यते ।] वि

7. प्रजापतिर्व्यस्रंसत (एकं) - आत्मन् हा(3) इत्यह्वयत् । (2-3-23) दू

8. यज्ञो राय (एकं) - न बाभीरिव विन्दती(3) । (2-5-23)* अनुदात्तप्लुतः अयम् ।

9. मित्रोऽसि (त्रीणि) - सुश्लोकाँ(4) सुमङ्गलाँ (4) सत्यराजा(3)न् । (2-6-22) दू

10. प्रजापतिस्ता ओदनं (द्वे) - अवेत्योऽवभृथा(3) ना(3) इति । (2-7-29) वि

11. ता सूर्याचन्द्रमसा (द्वे) - अधः स्विदासी(3)दुपरि स्विदासी(3)*त् । (2-8-75) * अनुदात्तप्लुतः अयम् । [द्र. पा.सू. 8-2-102] वि

12. उपहूतम् (एकं) - उपहूताँ(4) हो । इडोपहूता । (3-5-17) दू

13. उपहूतम् (एकं) - उपहूताँ(4) हो । इडोपहूता । (3-5-29) दू

14. यो वै ब्रह्मणे (द्वे) - द्वादशारत्नी रशना कर्तव्या(3) त्रयोदशारत्नी(3)रिति । (3-8-9) वि

15. युञ्जन्ति (त्रीणि) - लाजी(3)ञ्छाची(3)न् यशोममाँ(4) इत्यतिरिक्तं (3-9-19) दू

16. अश्वस्य (द्वे) - अश्वस्तोमीयं पूर्वं होतव्या(3)न्द्विपदा(3) इति । (3-9-48) वि

17. प्रजापतिर्देवान् (द्वेद्वे) - वेत्थ सावित्रा(3)न्न वेत्था(3) इति । वि (का. 1-25)*{द्विः}

18. [कूर्कुरः - अविद हा(3) इत्यविदं हीति (ए. 2-16)] - एक(ान्न?)चत्वारिंशत्प्लुताः? ॥

आरण्यके -

1. विश्वा (द्वयं) - होतव्यमग्निहोत्रा(3)न्न होतव्या(3)मिति । (आ. 8-79) वि

2. अग्निश्च (द्वयं) - सोमपा(3) असोमपा(3) इति निगदव्याख्याताः । (आ. 1-40) दृ

3. सावित्रम् (द्वयं) - होतव्यन्दीक्षितस्य गृहा(3)इ न होतव्या(3)मिति । (आ. 8-9) वि

4. असन्नेव (द्वयं) - कश्चन गच्छती(3) । ... । कश्चित्समश्नुता(3) उ । (आ. 5-29) वि

5. देवा (एकं) - यद्वौं(4) इत्यपतत् । (आ. 8-5)

6. नकं (सप्त) - हा(3)वु हा(3)वु हा(3)वु । अहमस्मि प्रथमजा ऋता(3)स्य । पूर्वन्देवेभ्यो अमृतस्य ना(3)भाइ । यो मा ददाति स इदेवमा(3)वाः । अहमन्नमन्नमदन्तमा(3)द्मि । (आ. 5-42) - षोडशारण्यके प्लुताः ।।

प्लुतानाम् उपयोगसन्दर्भानुगुणम् अर्थभेदाः विवृताः - 8.2.82 वाक्यस्य टेः प्लुत उदात्तः इत्यत्र प्लुतमधिकृत्य, 8.2.84 दूराद्धूते च, 8.2.97 विचार्यमाणानाम्, 8.2.106 प्लुतावैच इदुतौ इत्यादिना ।

कम्पाः -

वेदेषु सस्वराः वर्णाः स्वरसन्धिविशेषेण कम्पन्ते, यथा अव्यवहितयोः स्वरितयोः, स्वरितोदात्तयोः वा मध्ये । उदाहरणानि यथा -

1. तै.सं. 2.1.6.5 - बहुरूपो भवति बहुदेवत्यो ३ ह्येष समृद्ध्यै

2. 2.2.11.5 - ते देवा मिथो विप्रिया आसन्ते ३ ऽन्योन्यस्मै ज्येष्ठायातिष्ठमानाश्चतुर्धा व्यक्रामन्

3. 5.4.3.3 - अजायां घर्मम्प्रासिंचन्त्सा शोचन्ती पर्णम्परांजिहीत सो ३ ऽर्कोऽभवत्तदर्कस्यार्कत्वम्

4. 6.1.1.7 (2) - इन्द्रो वृत्रमहन्त्सोऽ३ पोऽ३ भ्यम्रियत

5. 6.1.5.1 - देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्तेऽ३ न्योन्यमुपाधावन्

6. 6.1.11.2 - उर्वन्तरिक्षमन्विहीत्याहान्तरिक्षदेवत्यो ३ ह्येतर्हि सोमः

7. 6.1.11.5 - विश्वान्यभि धामानीत्याह विश्वानि ह्ये ३ षोऽभि धामानि प्रच्यवते

8. 6.2.2.1 - देवासुराः संयत्ता आसन्ते देवा मिथो विप्रिया आसन्तेऽ ३ न्योन्यस्मै ज्येष्ठायातिष्ठमानाः पञ्चधा व्यक्रामन्

9. 6.2.2.2 - यो नः प्रथमोऽ ३ न्योन्यस्मै द्रुह्यादिति

10. 6.3.2.5 - इदमहम्मनुष्यो मनुष्यानित्याह मनुष्यो ३ ह्येष सन्मनुष्यानुपैति

11. 6.2.10.4 - बर्हिरवं स्तृणाति पितृदेवत्य १ं३ ह्येतद्यन्निखातम्

12. 6.3.4.2 - बर्हिरवं स्तृणाति पितृदेवत्य १ं३ ह्येतद्यन्निखातम्

13. 6.4.2.3 (2) - वृत्रमंहन्भ्यो ३ ऽपो ३ ऽभ्यंम्रियत

14. 6.4.9.2 - तस्माद्ब्राह्मणेनं भेषजं न कार्यमपूंतो ह्ये ३ षोंऽमेध्यो यो भिषक्

15. 6.4.10.1 - ब्रह्मंण्वन्तो देवा आसन्ब्रह्मंण्वन्तोऽसुंरास्ते ३ऽन्योन्यं नाशंक्नुवन्नभिभंवितुम्

16. 6.6.8.1 - देवा वा इंन्द्रियं वीर्यं १ व्यंभजन्त ।। (आहत्य 18)

1. तै.आ. 2.4.1 (4) - ते१ऽस्मद्यक्ष्ममनांगसः, .. तेन योऽ१स्मध्समृंच्छाते, .. तेनान्योऽ१स्मध्समृंच्छाते, .. रायोऽनुंमार्ष्टि तन्वो१ यद्विलिंष्टम् ।

2. 2.5.3 (2) - सꣳशिंतर्वीर्य १ म् बलम्, .. ब्रह्मंणाऽमित्राननुंनयामि स्वा १ म् अहम् ।

3. 2.6.2 - यत्रं सुहार्दस्सुकृतो मदंन्ते विहाय रोगंन्तन्वा १४ स्वायाम् ।

4. 5.15.10 (2) - अहमन्नादोऽ१ हमन्नादोऽ१ हमन्नादः । (आहत्य 9)

एवं संहितायां स्वरितकम्पाः (18), आरण्यके उदात्तकम्पाश्च (9) दृश्यन्ते इति बोध्यम् । आहत्य 27 ।।

Notes

1. निमूलसमूलयोः कषः (3-4-34)
2. शुष्कचूर्णरूक्षेषु पिषः (3-4-35)
3. समूलाकृतजीवेषु हन्कृञ्ग्रहः (3-4-36)
4. करणे हनः (3-4-37)
5. स्नेहने पिषः (3-4-38)
6. हस्ते वर्तिग्रहोः (3-4-39)
7. स्वे पुषः (3-4-40)
8. अधिकरणे बन्धः (3-4-41)
9. संज्ञायाम् (3-4-42)
10. कर्त्रोर्जीवपुरुषयोर्नशिवहोः (3-4-43)
11. ऊर्ध्वे शुषिपूरोः (3-4-44)
12. उपमाने कर्मणि च (3-4-45)

13. क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः (3-4-2)

14. See महाभाष्य of पतञ्जलि under rule no. 8-1-12.

15. See महाभाष्य of पतञ्जलि under rule no. 8-1-12.

16. परेर्वर्जने (8-1-5)

17. प्रसमुपोदः पादपूरणे (8-1-6)

18. उपर्यध्यधसः सामीप्ये (8-1-7)

19. एकं बहुव्रीहिवत् (8-1-9)

20. द्वन्द्वं रहस्य-मर्यादावचन-व्युत्क्रमण-यज्ञपात्रप्रयोग-अभिव्यक्तिषु (8-1-15)

21. See काशिकावृत्ति of वामन, a commentary on अष्टाध्यायी rule no. 8-1-15.

22. See महाभाष्य of पतञ्जलि under rule no. 8-1-12.

23. यथास्वे यथायथम् (8-1-14)

24. अकृच्छ्रे प्रियसुखयोः अन्यतरस्याम् (8-1-13)

25. See महाभाष्य of पतञ्जलि under rule no. 8-1-12.

26. वाक्यादेरामन्त्रितस्य असूया-सम्मति-कोप-कुत्सन-भर्त्सनेषु (8-1-8)

27. See महाभाष्य of पतञ्जलि under rule no. 8-1-12.

28. See महाभाष्य of पतञ्जलि under rule no. 8-1-12.

29. See महाभाष्य of पतञ्जलि under rule no. 8-1-12.

30. See महाभाष्य of पतञ्जलि under rule no. 8-1-12.

31. See महाभाष्य of पतञ्जलि under rule no. 8-1-12.

32. See महाभाष्य of पतञ्जलि under rule no. 8-1-12.

Bibliography

1. S.C. Vasu - अष्टाध्यायी (Translation in English) rules 3-4-1 to 3-4-45, published by Motilal Banarsidoss, Delhi.

2. ------------------ do --------------- rules 6-1-1 to 6-1-11

3. ------------------ do --------------- rules 8-1-1 to 8-1-15

4. Katre, S.M. ASTADHYAYI (Translation in English) of abovementioned rules. Published by C.A.S.S, Univ. of Pune.

5. S.D. Joshi - व्याकरण महाभाष्य (Translation in English) of above rules. Published by C.A.S.S, Univ. of Pune.